नं० ४३८० – ग

सांख्यप्रवचन भाष्यम्।

पत्राणि १८३

एकस्य तत्त्वाद प्रच्युतस्य पूर्वविपरीतासत्यानेकरूपावभासो विवर्त्तः ॥ अत्ताभासविधिाक्रं बिंबप्रति बिंबम् ॥

कपिलशास्त्र

सां·भा·
१

॥श्रीगणेशाय नमः॥ ॥एकोऽद्वितीय इति वेदवचांसि पुंसि सर्वाभिमानविनिवर्त्तन
स्य मुक्त्यै वैधर्म्यलक्षणभिदां विरहं वदन्ति नात्यन्तमेव धर्मशतान्यविरोधात् १
तत्संस्कृतस्य मननाय नमोपदेष्टुं सद्युक्तिजालमिह सांख्यकृदाविरासीत् नारायणः
कपिलमूर्त्तिरशेषदुःखहानाय जीवनिवहस्य नमोऽस्तु तस्मै २ नानोपाधिषु पन्ना
नां रूपं भासं नलार्कवत् तत्समं सर्वभूतेषु चित्सामान्यमुपास्महे ३ ईश्वरानीश्वर
त्वादिविवेकरसवस्तुनि विमूढा यत्र पश्यन्ति तत्रास्मि परमं महः ४ कालार्कभक्षितं
सांख्यशास्त्रं ज्ञानसुधाकरम् कलावशिष्टं भूयोऽपि पूरयिष्ये वचोऽमृतैः ५ चिद
चिद्ग्रन्थिभेदेन मोचयिष्येऽखिलानपि सांख्यभाष्यमिषेणात्मा प्रीयतां मोक्षदो हरिः
६ तत्त्वमेवत्वमेवतदेवं श्रुतिशतोदितम् सर्वात्मनामवैधर्म्यशास्त्रस्यास्यैव गो

चरः ॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादिश्रुतिषु
परमपुरुषार्थसाधनस्यात्मसाक्षात्कारस्य हेतुतया श्रवणादित्रयं विहितं तत्र
श्रवणे द्वावुपायावस्यां स्मर्यंते श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिः
मत्वा च सततं ध्येय एते दर्शनहेतव इति ध्येयो योगशास्त्रोक्तप्रकारेणेति शेषः तत्र
श्रुतिभ्यः श्रुतेषु पुरुषार्थतद्धेतुज्ञानतद्विषयात्मस्वरूपादिषु सकलविरोधिनीरू
पपत्तीः षड्ध्यायीरूपेण विवेकशास्त्रेण कपिलमुनिर्भगवानुपदिदेश नतु
न्यायवैशेषिकाभ्यामप्येतेष्वर्थेषु न्यायः प्रदर्शित इति ताभ्यामस्य गतार्थत्वं सगु
णनिर्गुणत्वादिविरुद्धरूपैरात्मसाधकतया तद्युक्तिभिरत्रैव सम्यक्तेनां विरोधेनो
भयोरेव द्वैतं च प्रमाणमिति मैवं व्यावहारिकपारमार्थिकरूपविषयभेदेन

सां·भा·
२

म

गतार्थत्वविरोधयोरभावात्॥ न्यायवैशेषिकाभ्यां हि सुखदुःखाद्यनुवदतो देहादिमात्रविवे
केनात्मप्रथमभूमिकायामनुमापितः। एकदा परसूक्ष्मे प्रवेशासंभवात्॥ तदीयं च ज्ञानं
देहाद्यात्मतानिरसनेन व्यावहारिकं तत्त्वज्ञानं भवत्येव यथा पुरुषे स्थाणुभ्रमनिरासकं
तया करचरणादिमत्त्वज्ञानं व्यवहारतस्तत्त्वज्ञानं तद्वत्॥ अत एव प्रकृतेर्गुणसंमूढाः
सज्जन्ते गुणकर्मसु। तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेदिति गीतायां कर्तृ
त्वाभिमानिनस्तार्किकस्याकृत्स्नवित्त्वमेव कृत्स्नवित्सांख्यापेक्षयोक्तं न तु सर्व[illegible]ज्ञत्व
मिति॥ तथा तदीयमपि ज्ञानमपरवैराग्यद्वारा परंपरया मोक्षसाधनं भवत्येवेति॥
न तज्ज्ञानापेक्षयापि च सांख्यज्ञानमेव पारमार्थिकं परवैराग्य द्वारा साक्षा राम·
न्मोक्षसाधनं च भवति॥ उक्तगीतावाक्येनात्माकर्तृत्वविलस्यैव कृत्स्नवित्त्वसिद्धेः॥ २

2

नीरोगो हि तदा भवति । हृदयस्य शोकोऽनेकमादि किं मन एव समानः सन्नुभौ लोकावनुसं
चरति । आत्मा मतीयं सम्प्रदत्र किंचिस्य स्यन्नचागतस्तेन भवतीत्यादिना तात्विकस्थितिश्च
तैः प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति म
न्यते निर्वाणमयमेवायमात्मा ज्ञानमयो मलः दुःखाज्ञानमयाधर्माः प्रकृतेस्तेन ना
त्मनः इत्यादिना चिद्रूपस्य तिष्ठते स्वभावमयं वैशेषिकोक्तज्ञानस्य परमार्थं भूमौ वाधितत्वा
च्च । न चैतावता स्यामा यज्ञामा एवं विवक्षितार्थो देहव्यतिरेकं श्रोत्रवाच्याभावात् यस्य
रः सशरीरार्थ इति मायायात् आत्मनि सुखादिमत्वस्य लोकप्रसिद्धत्वात् तत्र प्रमाणं त
दांन यैः प्रवणेन तद्देशस्यावगेवादृत्वात् नव्यारभ्यतात्पर्यं विषयत्वमिति स्यादेतत् मा
यवैशेषिकयोगम विरोधो भवतु ब्रह्ममीमांसायोगाभ्यां तु विरोधोऽस्त्येवेता

सा॰ भा॰
२

भ्यां निसेश्वरसाधनात्॥ अत्र चेश्वरस्य प्रतिषेधमानत्वात्॥ तथात्रापि व्यवहारपरमार्थ
भेदेन सेश्वरनिरीश्वरवादयोरविरोधोस्तु सेश्वरवादस्योपासनापरत्वसंभवादिति
वाच्यं विनिगमकाभावात् ईश्वरो हि दुर्ज्ञेय इति निरीश्वरत्वमपि लोकव्यवहारसिद्ध
मैश्वर्यवैराग्याद्यनुवदितुं शक्यते॥ आत्मनः सगुणत्वमिव न तु क्वापि ब्रह्मसूत्रादावीश्व
रः स्फुटं प्रतिषिध्यते येन सेश्वरवादस्यैव व्यावहारिकत्वमवधार्येतेति अत्रोच्यते
अत्रापि व्यवहारपरमार्थभेदो भवति असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमित्यादि
शास्त्रैर्निरीश्वरवादस्य निन्दितत्वादस्मिन्नेव शास्त्रे व्यावहारिकस्यैवेश्वरप्रतिषेध
स्यैश्वर्यवैराग्याद्यर्थमनुवादौचित्यात् यदि हि लोकायतिकमतानुसारेण नित्यैश्व राम॰
र्यं न प्रतिषिध्येत तदा परिपूर्णनित्यनिर्दोषैश्वर्यदर्शनेन तत्र चित्तावेशतो विवेकाभ्या २

मप्रतिबंधः स्यादिति सांख्याचार्याणामाशयः सेश्वरवादस्य न कापिलनिंदादिकमस्ति
येनोपासनादिपरतया तत्शास्त्रं संकोच्येत यत्तु नास्ति सांख्यसमं ज्ञानं नास्ति योग
समं बलं अत्र वः संशयो माभूत् ज्ञानं सांख्यं परं मतमिति सांख्याकांतद्विवेकांश एव सां
ख्यज्ञानस्य दर्शनांतरेभ्य उत्कर्षं प्रतिपादयति न त्वीश्वरप्रतिषेधांशेपि तथा पराशराद्य अपिच५
खिलशिष्टसंवादादपि सेश्वरवादस्यैव पारमार्थिकत्वमवधार्यते अक्षपादप्रणीते
च काणादे सांख्ययोगयोः त्याज्यः श्रुतिविरुद्धोंशः श्रुत्येकशरणैर्नृभिः जैमिनीये च
वैयासे विरुद्धांशो न कश्चन श्रुत्या वेदार्थविज्ञाने श्रुतिपारं गतौ हि ताविति पराशरो
पपुराणादिभ्योपि ब्रह्ममीमांसाया ईश्वरांशे बलवत्त्वं तथा न्यायतंत्राण्यनेकानि तै
स्तैरुक्तानि वादिभिः हेत्वागमसदाचारैर्यद्युक्तं तदुपास्यतामिति मोक्षधर्मवाक्या

द्विपराशराद्यखिलशिष्टव्यवहारेण ब्रह्ममीमांसान्यायवैशेषिकाद्युक्तईश्वरसाधक
मायएवन्याय्योबलवत्वात् तथापि न पश्यंति योगीन्द्राः सांख्या अपि महेश्वरं अनादि
निधनं ब्रह्म तमेव शरणं व्रजेदित्यादिकौर्मादिवाक्यैः सांख्यानामीश्वराज्ञानस्यैव ना
रायणादिना प्रोक्तत्वाच्च किंच ब्रह्ममीमांसाया ईश्वर एव मुख्यो विषय उपक्रमादि
भिरवधृतः तत्रांशे तस्य बाधे शास्त्रस्यैवाप्रामाण्यं स्यात् यत्परः शब्दः स शब्दार्थ
इति न्यायात् सांख्यशास्त्रस्य तु पुरुषार्थतत्साधनप्रकृतिपुरुषविवेकावेव मुख्यो
विषय इति ईश्वरप्रतिषेधांशबाधेपि नाप्रामाण्यं यत्परः शब्दः स शब्दार्थ इति न्या
यात् अतः सावकाशतया सांख्यमेवेश्वरप्रतिषेधांशे दुर्बलमिति न च ब्रह्ममीमां
सायामपीश्वर एव मुख्यो विषयो न तु नित्यैश्वर्यमिति वक्तुं शक्यते स्मृत्यनवकाश

दोषप्रसंगस्तूर्वं पक्षस्यानुपपत्त्या नित्यैश्वर्यसिद्धिः इत्यवैनैव ब्रह्ममीमांसाविषय
त्वावधारणं तद्ब्रह्मशब्दस्य ब्रह्म(पृ)सैपेव सुख्यत्तयातुश्च ध्यातः परब्रह्मजिज्ञासेति न
सूत्रितमिति एतेन सांख्यविरोधात् ब्रह्मयोगदर्शनयोः कार्येश्वरपरत्वमपि न
शंकनीयं प्रकृतिस्वातंत्र्यापसारचनानुपपत्तेश्च नानुमानमित्यादिब्रह्मसूत्रपरं
परानुपपत्तेश्च तथा सपूर्वेषामपि गुरुः कालेनानवच्छेदात् इति योगसूत्रे तदि
व्यासभाष्याभ्यां स्फुटमीशनित्यतावगमाच्चेति तस्मादभ्युपगमवादप्रौढिवादादि
नैव सांख्यस्य व्यावहारिकेश्वरप्रतिषेधपरतया ब्रह्ममीमांसायोगाभ्यां सह न
विरोधः अभ्युपगमवादश्च शास्त्रे दृष्टो यथा विष्णुपुराणे एते भिन्नदृशां दैत्य
विकल्पाः कथिता मया कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां ममेति अस्तु वा पा

सा॰भा॰
५

पानां ज्ञानप्रतिबंधार्थमास्तिकदर्शनेष्वप्यंशतः श्रुतिविरुद्धार्थव्यवस्थापनं तेषु
तेष्वंशेष्वप्रामाण्यं च श्रुतिस्मृत्यविरुद्धेषु तु मुख्यविषयेषु प्रामाण्यमस्त्येव अ
त एव पद्मपुराणे ब्रह्मयोगदर्शनातिरिक्तानां दर्शनानां निंदाप्युपपद्यते यथा तत्र
पार्वतीं प्रतीश्वरवाक्यं शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमं येषां श्रवणमा
त्रेण पातित्यं ज्ञानिनामपि प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकं मच्छक्त्यावेशि
तैर्विप्रैः संप्रोक्तानि ततः परं कणादेन तु संप्रोक्तं शास्त्रं वैशेषिकं महत् गौतमेन त
थान्यायं सांख्यं तु कपिलेन वै द्विजन्मना जैमिनिना पूर्वं वेदमयार्थतः निरीश्व
रेण वादेन कृतं शास्त्रं महत्तरं धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितं दैत्यानां ना
शनार्थाय विष्णुना बुद्धरूपिणा बौद्धशास्त्रमसत्प्रोक्तं नग्ननीलपटादिकम्॥ रा॰म॰
५

5

मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च मयैव कथितं देवि कलौ ब्राह्मणरूपि
णा अपार्थं श्रुतिवाक्यानां दर्शयंल्लोकगर्हितं कर्मस्वरूपत्याज्यत्वमत्रैव प्रतिपा
द्यते सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र चोच्यते परात्मजीवयोरैक्यं मयात्र प्रतिपा
द्यते ब्रह्मणोस्य परं रूपं निर्गुणं दर्शितं मया सर्वस्य जगतोप्यत्र नाशनार्थं कलौ
युगे वेदार्थवन्महाशास्त्रं मायावादमवैदिकं मयैव कथितं देवि जगतां नाश
कारणादिति अधिकं तु ब्रह्ममीमांसाभाष्ये प्रपंचितमस्माभिरिति तस्मादास्ति
कशास्त्रस्यानर्कस्याप्रामाण्यं विरोधो वा स्वस्वविषयेषु सर्वेषामबाधात्॥
अविरोधश्चेति नन्वेवं पुरुषवचस्त्वांशेप्यस्य शास्त्रस्याभ्युपगमवादत्वं स्यान्न
रा स्यात् अविधात् ब्रह्ममीमांसायामप्यंशेनानभ्युपदेशादस्यादिसत्रजाते

सा॰ भा॰ ६ 6

जीवात्मन्यत्वस्यैव निर्णयात् सांख्यसिद्धपुरुषाणामात्मत्वं तु ब्रह्ममीमांसया
बाध्यत एव आत्मेति तूपयंतीति तत्सूत्रेण परमात्मन एव परमार्थभूमावा
त्मत्वावधारणात् तथापि च सांख्यस्य नाप्रामाण्यं व्यावहारिकात्मनो जीवस्येतर
विवेकज्ञानस्य मोक्षसाधनत्वे विवक्षितार्थे बाधाभावात् एतेन श्रुतिस्मृति
प्रसिद्धयोर्नानात्मैकात्मत्वयोर्व्यावहारिकपारमार्थिकभेदेनाविरोधः ब्रह्मस
मीमांसायां प्रपंचितमस्माभिरिति दिक् तदेवमपि तत्वसमासाख्यसूत्रैः सह
स्याः षडध्याय्याः पौनरुक्त्यमिति चेत् मैवं संक्षेपविस्ताररूपेणोभयोरपौन
रुक्त्यात् अत एवास्याः षडध्याय्या योगदर्शनं सांख्यप्रवचनसंज्ञा युक्ता तत्व स्येव ८
समासाख्यं हि यत्संक्षिप्तं सांख्यदर्शनं तस्यैव प्रकर्षेण अस्यां निर्वचनमिति राम॰ ६

विशेषस्त्वयं यत् षडध्यायां तत्त्वसमासाख्योक्तार्थविस्तारमात्रं योगदर्शने
त्वाभ्यामभ्युपगमयाद्दृष्टप्रतिबिद्धः सेश्वरस्य निरूपणेन न्यूनतापरिहारोपीति ॥
अस्य च सांख्यसंज्ञा सान्वर्था संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते तत्त्वानि च तु
र्विंशतिस्तेन सांख्याः प्रकीर्तिता इत्यस्याभियोभारतादिवाक्यैः संख्यां सम्यग्विवे
केनात्मकथनमिति अर्थः । अतः सांख्यशास्त्रस्य योगसूत्रतयात्तत्कारणं सांख्यके
गाधिगम्यं रसादिष्वति पृ एषा तेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु इति सा लप
दित्यत्र च सांख्यशब्देन सांख्य [illegible] शास्त्रमेव ग्राह्यं न पुनरर्थांतरं किं नी
यमिति तदिदं मोक्षशास्त्रं चिकित्साशास्त्रवच्चतुर्व्यूहं यथाहि रोगरोगनिदा
नं [illegible] आरोग्यं [illegible] भैषज्यमिति चत्वारो व्यूहाः समुदायाश्चिकित्साशास्त्र

सां॰ भा॰
७

स्य प्रतिपाद्याः तथैव हेयं हानं हेयहेतुर्हानोपायश्चेति चत्वारो व्यूहा मोक्षशास्त्रस्य प्र
तिपाद्या भवंति मुमुक्षुभिर्जिज्ञासितत्वात् तत्र त्रिविधं दुःखं हेयं तदत्यंतनिवृ
त्तिर्हानं प्रकृतिपुरुषसंयोगद्वारा चाविवेको हेयहेतुः विवेकख्यातिस्तु हानोपाय
इति व्यूहशास्त्रे न चैषामुपक्रमेण संग्रहः तत्र चादौ फलत्वेनाभ्यर्हितं हानं तत्प्रति
योगित्रिविधमेव च हेयं प्रतिपादयिष्यन् शास्त्रकारः शिष्यावधानाय शास्त्रारं
भमपि प्रतिजानीते अथ त्रिविधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थः अथश
ब्दोयमुच्चारणमात्रेण मंगलरूपः अतएव मंगलाचरणं शिष्टाचारात् इति सू
त्रमेव पंचमाध्याये वक्ष्यति अर्थस्त्वत्राथशब्दस्याधिकार एव प्रश्नानंतर्या
दीनां पुरुषार्थेन सहान्वयासंभवात् ज्ञानाधानंतर्यस्य च सूत्रैरेव वक्ष्यमाण

राम॰
७

तथा तत्त्वनिपादनवैयर्थ्यात् अधिकारिभिन्नप्रयोजनैशास्त्रारंभप्रतिज्ञाप्रलाभ
प्रसंगाच्च तस्मात्पुरुषार्थस्योपक्रमोपसंहारदर्शनादधिकारार्थत्वमेवोचितं
तद्बुद्धि[illegible]कृतिः पुरुषार्थस्योपसंहारेऽभिधास्यतीति अधिकारस्याधिकारिनप्राधा
न्येनारंभणं आरंभस्य च यद्यपि साक्षाच्छास्त्रस्यैव तथापि तद्द्वारा शास्त्रार्थत
द्विचारयोरपीति तथा च साधनानुपपत्तौ सक्तितो पयोक्त पुरुषार्थोऽधिकृतः गता पयाद्वस्था
प्राधान्येन निरूपयितुमस्माभिरारभ्यत इति सूत्र गतार्थः त्रिविधमाध्यात्मिकमाधि
भौतिकमाधिदैविकं च दुःखं तत्रात्मानं स्वसंघातमधिकृत्य प्रवृत्तमित्याध्यात्मिकं शारी
रं मानसं च तत्र शारीरं व्याध्याद्युत्थं मानसं कामाद्युत्थं भूतानि प्राणिनो अधिकृत्य प्रवृ त्य
त्तमित्याधिभौतिकं व्याघ्रचौराद्युत्थं देवानग्निवाय्वादीनधिकृत्य प्रवृत्तमित्याधिदै

सां॰ भा॰ ८

8

विवेकदृष्टिनाशकमिति विभागः यद्यपि सर्वमेव दुःखं मानसं तथापि मनोमात्रज
मत्वाजमत्वाभ्यां मानसत्वामानसत्वविशेषः एषां त्रिविधदुःखानां याऽत्यंतनिवृ
त्तिः स्थूलसूक्ष्मसाधारण्येन निःशेषतो निवृत्तिः सोऽत्यंतः परमः पुरुषार्थः पुरुषा
णां बुद्धेरिष्ट इत्यवांतरवाक्यार्थः तत्र स्थूलं दुःखं वर्तमानावस्थं तत्स्वद्वितीयक्ष
णात् उपरि स्वयमेव नंक्ष्यति अतो न तत्र ज्ञानापेक्षा अतीतं तु प्रागेव नष्टमिति
न तत्र साधनापेक्षेति परिशेषादनागतावस्थसूक्ष्मदुःखनिवृत्तिरेव पुरुषार्थः
तथा प्रकृते पर्यवसन्नमिति तथा च योगसूत्रम् हेयं दुःखमनागतमिति निवृत्तिश्च
न नाशोऽपि तु अतीतावस्था ध्वंसप्रागभावयोरतीतानागतावस्थास्वरूपत्वात्
सत्कार्यवादिभिरभावानंगीकारात् ननु कदाचिदप्यवर्तमानमनागतं दुःखम

राम॰ ८

प्रामाणिकं अतः खपुष्पनिवृत्तिवत् तन्निवृत्तेर्न पुरुषार्थत्वं युक्तमिति चेन्मैवं सर्वत्र हि स्व
स्वकार्यजननशक्तिमतीव द्रव्यस्यायिनीति पातंजले सिद्धं दाहादिशक्तिरस्याग्न्यादेः
द्रव्यदर्शनात् सा च शक्तिरनागतावस्था तत्तत्कार्यरूपाद्यमेव चोपादानकारणस्वरू
पयोग्यतेत्यपदिश्यते अतो यावच्चित्तसत्ता तावदेवानागतदुःखसत्तानुमीयते तन्नि
वृत्तिश्च पुरुषार्थ इति जीवन्मुक्तिदशायां च प्रारब्धकर्मफलातिरिक्तानां दुःखानामना
गतावस्थानां बीजात्मनां दाहोऽपि विदेहकैवल्ये तु चित्तेन सह विनाश इत्यवान्तरविशेषः वी
जदाहश्चास्याविद्याकार्यविच्छेदमात्रं ज्ञानस्याविद्यामात्रोच्छेदत्वस्य लोके सिद्धत्वात् ॥
अत एव चित्तेन सहैव दुःखस्य नाशः ज्ञानस्य साक्षाद्दुःखादिनाशकत्वे प्रमाणाभावा
दिति ननु तथापि दुःखनिवृत्तिर्न पुरुषार्थः संभवति दुःखस्य चित्तधर्मत्वेन पुरुषेत

सां·भा·
९

9

न्निष्टस्य संभवात् दुःखनिवृत्तिरूपस्य दुःखानुत्पादार्थकत्वेऽपि पुरुषे तस्य नित्यसिद्धत्वा
त् यत्तु कंठचामीकरवत् सिद्धेऽप्यसिद्धत्वभ्रमात् पुरुषार्थत्वं स्यादिति तन्न एवमपि पुमान्नि
र्दुःख इति श्रवणमननोत्तरं दुःखहान्यर्थं निदिध्यासनादौ प्रवृत्त्यनुपपत्तेः वक्ष्यमाणस्य सा
ध्ये स्वोपाये फलनिश्चयादेव प्रवृत्तिर्भवति प्रकृते तु श्रवणमननाभ्यां सिद्धत्वज्ञानान्ना
प्रामाण्यज्ञानानास्कंदितः फलस्यासिद्धत्वनिश्चयोस्तीति किंच भवतु कदाचिद्भ्रमा
दिना पुरुषेच्छाविषयत्वं दुःखाभावस्य श्रुतिस्तु मोहनाशिनी कथं सिद्धस्य फलत्वं
प्रतिपादयेत् तरति शोकमात्मवित् विद्वान् हर्षशोकौ जहातीत्यादि इति अत्रोच्य
ते न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते इति हेयहेत्ववधारकसूत्रे
दौ वायं पूर्वपक्षः समाधास्यते तथाहि प्रतिबिंबरूपेण पुरुषेपि सुखदुःखे स्तः

राम·
९

अन्यथा तस्यो भोग्यत्वानुपपत्तेः सुखादिग्रहणं भोगो ग्रहणं च तदाकारता सा च कू
धी टस्य चितौ बुद्धेरंकारवत् परिणामेन संभवतीत्यसंगस्य प्रतिबिंबस्वरूपतायामेव
पर्यवस्यति अयमेव बुद्धिवृत्तिप्रतिबिंबो वृत्तिसारूप्यमितरत्रेति योगसूत्रेणोक्तः
सत्वे तु तप्यमानेन तदाकारानुरोधात् पुरुषोप्यनुतप्यत इव दृश्यत इति योगभाष्ये च
तदाकाराध्यंपते कुसुमवच्च पाणेरिति वेदांतिवद्भिरनुरोधग्राह्येन वित्तिष्वेव तापादि
दुःखस्य प्रतिबिंब उक्तः अत एव पुरुषस्य बुद्धिवृत्त्युपरागे स्फटिकं दृष्टांतं सूत्र
कारो वक्ष्यति कुसुमवच्च मणिरिति वेदंतिभिरपि चेतने ध्यस्तत्तयैव दृश्यमानमु
च्यते सत्याध्यासः प्रतिबिंबं विना न घटेत ज्ञानमात्रस्याध्यासत्वे ज्ञात्माध्यासात्
अध्यासात् ज्ञानं ज्ञानमेव चाध्यास इति तदेतत्स्मर्यते विं एतस्मिन् दर्पणे स्फारे

सा॰भा॰
१०

समस्तावस्थादृश्यः इमास्ताः प्रतिबिंबंति सरसीव तटद्रुमा इति॥ अत्र हि दृशि बुद्धेर्वु
त्तिवृत्तिसामान्यपरोक्षक्तिसाम्यात्॥ प्रतिबिंबश्च तत्तदुपाधिषु बिंबाकारश्चित्तपरिणा
मः इति तस्मात्प्रतिबिंबरूपेण पुरुषे दुःखसंबंधो भोगाख्योऽस्ति॥ अतस्तेनैव रूपेण त
न्निवृत्तेः पुरुषार्थत्वं युक्तं॥ अत एव दुःखं मा भुंजीयेति प्रार्थनाप्यापामरं दृश्यते॥
तच्च दुःखभोगनिवृत्तेः पुरुषार्थत्वं अमश्रोषतमानसं भवतीति सैव स्वतः पुरुषार्थः॥
दुःखनिवृत्तिस्तु कंटकादिनिवृत्तिवत्तादर्थ्येन॥ न स्वतः पुरुषार्थः॥ एवं सुखमपि न
स्वतः पुरुषार्थः॥ किंतु तद्भोग एव तदिदं दुःखभोगनिवृत्तेः पुरुषार्थत्वं भाष्येऽप्यास
देवैरुक्तं तस्मिन्निवृत्ते पुरुषः पुनरिदं तापत्रयं न भुंक्ते॥ अतः शक्तावपि दुःखनिवृत्तेः
पुरुषार्थत्वं विषमता संबंधेनैव बोध्यं॥ तदेतद्योगवार्त्तिके प्रपंचितमस्माभिरिति

रा॰म॰
१०

दिक॰॥ तदेवमनेन सूत्रेण व्यूहद्वयं संक्षेपेणोक्तं दृष्टं विस्तरस्त्वनयोः पश्चाद्भविते
ति अतः परं वक्ष्यमाणस्य हानोपायव्यूहस्याकांक्षार्थं तदितरेषां हानोपायत्वं
प्रसाधयत्सूत्रजातेन नहृष्टात्तत्सिद्धिर्निवृत्तेरप्यनुवृत्तिदर्शनात् लौकिकदुपाया
द्धनादेरसंतदुःखनिवृत्तिसिद्धिर्नास्ति॥ कुतः धनादिनादुःखे निवृत्ते पश्चाद्धना
दिक्षयेपुनरपि दुःखानुवृत्तिदर्शनादित्यर्थः तथाचस्मृतिः अमृतत्वस्य तु नाशा
वक्तप्रतीकार स्ति वित्तेनेत्यादिः नन्वेवं धनाद्यर्जनस्यकुंजरशौचवत् दुःखानिवर्तकत्वे कथं
तत्र प्रवृत्तिस्तत्राह प्रात्याहिकस्य प्रतीकारं चेष्टनात्पुरुषार्थत्वं॥ इष्टसाधनज
न्मा यां दुःखनिवृत्तावस्यैव पुरुषार्थत्वमेव नास्ति॥ यथाकथंचित्पुरुषार्थत्वंत्वस्ते
व॥ कुतः प्रात्याहिकस्य क्षुद्दुःखस्य निराकरणं एव दृष्टेवतेन धनादिना दुःखनिराक

सा० भा० रणस्यचेष्टनात् अन्वेषणादिरपार्थः॥ अतोधनाद्यर्जनेप्रवृत्तिरूपयत्नइतिभावः॥
११ कुंजरशौच्यादिकमप्यपातदुःखनिवर्तकत्वमामंदपुरुषबाध्यंभवत्येवेति॥ सत्यदृष्ट
साधनजेमंदपुरुषबाध्येविद्वद्भिर्हेयइत्याह॥ सर्वासंभवात्संभवेपिसत्तासंभवादेषः
प्रमाणकुशलैः सत्यदृष्टसाधनजोदुःखप्रतिकारेदुःखाद्दुःखविवेकप्रणस्ताभिज्ञै
र्हेयोदुःखप्रक्षेपनिक्षेपणीयःकृतः सर्वासंभवात् सर्वदुःखेषुदृष्टसाधनैःप्रती
कारासंभवात् यत्रापिसंभव[ ]स्तत्रापिसंभ[...] [...]प्रतिग्रहपापाद्युत्थदुःखा
वश्यकत्वमाह संभवेपीति संभवेपिदृष्टोपायानांतरीयकादुःखसंपर्कावश्यंभा
वादिरपार्थः॥ तथाचयोगसूत्रं॥ परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च॥ रम०
सर्वमेवदुःखंविवेकिनइति॥ ननुदृष्टसाधनजन्मेसर्वस्मिन्नेवदुःखप्रतिकारेदुः ११

खसंभेदनियमोऽप्रयोजकः तथा च स्मर्यते यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं
अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदमिति तत्राह उत्कर्षादपि मोक्षस्य स
र्वोत्कर्षश्रुतेः ५ दृष्टसाधनासाध्यस्य मोक्षस्य दृष्टसाधनसाध्यात्स्वर्गादिभ्य उ
त्कर्षात् तेन दुःखसत्तावधार्यते अपिशाकद्विंगुणत्वकत्वादेरपि मोक्षस्योत्क
र्षप्रमाणं सर्वोत्कर्षश्रुतेरिति न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति
अशरीरं वाव संतं प्रियाप्रिये न स्पृशतः इत्यादिना विदेहकैवल्यस्योत्कर्षश्रुतेरित्य
र्थः ननु मा भवतु दृष्टसाधनाद्ध्वंसं दुःखनिवृत्तिः अदृष्टसाधनात्तु वैदिककर्म
णः स्यात् अपाम सोमममृता अभूमेत्यादिश्रुतेरिति तत्राह अविशेषश्चोभयोः ६
उभयोर्दृष्टादृष्टयोः असंतदुःखनिवृत्तिसाधकत्वेन मोक्षं प्रति तुल्यत्वादवि

सां॰ भा॰
१२

ष्टोपायएवमंतव्यस्साध्यः एतदेवकारिकयाप्यनूक्तं दृष्टवदानुश्रविकः सह्यविशुद्धिक्षया
तिशययुक्तः इति गुरोरनुश्रूयत इत्यनुश्रवो वेदः तद्विहितयागादिरानुश्रविकः स
दृष्टेनोपायवद्दोषाद्युक्तः हिंसाद्यपापेनविनाशिसातिशयफलकत्वेनच युक्तस्साध्यः
वैध ननुहिंसायाः पापजनकत्वेबलवदनिष्टानुबंधीष्टसाधनत्वरूपस्यविध्यर्थस्या
नुपपत्तिरितिचेन्न वैधहिंसाजन्यानिष्टस्येष्टोत्पत्तिनांतरीयकत्वेनइष्टोत्पत्तिनांतरी
यकदुःखाधिकदुःखाजनकत्वरूपस्यबलवदनिष्टाननुबंधित्वस्यविध्यर्थस्याक्ष
12 तेः यत्तुवैधहिंसातिरिक्तहिंसाया एव पापजनकत्वमिति तदसत् संकोचेप्रमा
णाभावात् युधिष्ठिरादीनांस्वधर्मेपि गुरुवधादेरनुतापदर्शनाद्विप्रसवाद्यपरिहारा
यप्रायश्चित्तश्रवणाच्चैतस्याध्यास्महे तावदहसे मंडूकस्संनिधित्रयीय राम॰
१२

कुफलैः
मेमधर्मो ह्यं किंपाकफलसन्निभमिति मार्कण्डेयवचनात्॥ अहिंसनं सर्वभूतानाम
मन्त्रतो ऽसम्प्रवर्तिष्यतिस्तस्यैवातिरिक्तं हिंसानिवृत्तेरिष्टसाधनत्वमेव वक्तव्यं न
तु वैधहिंसायागानिष्टसाधनत्वाभावमपीत्यादिकं योगवार्तिके द्रष्टव्यमिति दि
क्॥ न कर्मणा न प्रजया न धनेन त्यागेनैके अमृतत्वमानशुः तमेव विदित्वाति
मृत्युमेति नान्यः पन्था विद्यतेऽयनायेत्यादिश्रुतिविरोधेन तु सोमपानादिभिर
मृतत्वं गौणमेव मन्तव्यं॥ आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति विष्णुपु
राणात्॥ तदेवं दृष्टादृष्टोपाययोः साक्षात्परमपुरुषार्थसाधनत्वे सा साधिते
तदुपायकांक्षायां विवेकज्ञानमेवेतरप्रतिषेधेन हेयविवेकाख्यं दुःखहेतुच्छेद
कत्वेनोपायतया स्थापयति नादावविवेकमेवेतरप्रतिषेधेन हेतुतयापरिशेष यति

प्रतिसघट्टकेन नस्वभावतोबद्धस्यमोक्षसाधनोपदेशविधिः ७ दुःखात्यंतनिवृत्ते
र्मोक्षत्वस्योक्तत्वात्तावंधोत्रदुःखयोगएवतस्यचस्वरूपेणस्वाभाविकत्वेवक्ष्यमा
णलक्षणमस्तियतोनस्वभावतोबद्धस्यमोक्ष साधनोपदेशस्यश्रौतस्यविधि
रनुष्ठानंनयोज्यानांघटतेनह्यग्नेःस्वाभाविकादौष्ण्यान्मोक्षःसंभवतिस्वाभाविक
स्ययावद्द्रव्यभावित्वादित्यर्थः तदुक्तमीश्वरगीतायां यद्यात्मामलिनोस्वछोवि
कारीस्यात्स्वभावतः नहितस्यभवेन्मुक्तिर्जन्मांतरशतैरपीतिः यस्मिन्सतिकारण
विलंबाद्युल्लंघोयस्योत्पत्तौनभवतितस्यतत्स्वाभाविकमितिस्वाभाविकलक्षणं
ननुसर्वदोपलंभापत्तेः दुःखस्यस्वाभापत्तेःदुःखस्यस्वाभाविकत्वशंकैवनास्ती
तिचेन्न त्रिगुणात्मकत्वेनचित्तस्यदुःखस्वभावत्वेपिसत्वाधिक्येनाभिभवात्स

दादुःखानुपलब्धिवत् आत्मनोपि तदनुपलब्धिसंभवात् ॥ दुःस्वाभाविकत्ववादिभि
र्बौद्धैः स्थितस्यैवात्मनोऽभ्युपगमाच्च ॥ अथैवमात्मनाशादेव मोक्षोऽस्त्विति चेन्न आह एव
ञ्च विमुक्तः स्यामिति बंधसामानाधिकरण्ये नैव मोक्षस्य पुरुषार्थत्वादिति भव
त्वननुष्ठानं तेन किमित्यत आह ॥ स्वभावस्यानपायित्वादननुष्ठानलक्षणमप्रामाण्यं ॥
स्वभावस्यापायवत्त्वमभावित्वान्मोक्षासंभवेन तत्साधनोपदेशश्रुतेरननुष्ठानलक्ष
णमप्रामाण्यं स्यादित्यर्थः ॥ ननु श्रुतिबलादेवानुष्ठानं स्यात्तत्राह ॥ नाशक्योपदेश
विधिरुपदिष्टेप्यनुपदेशः ॥ न अशक्यफलायोपदेशस्यानुष्ठानं संभवति
यत उपदिष्टेपि विहितेपि अशक्यस्योपाये स उपदेशो न भवति किं तूपदेशाभास एव
वक्तापि तमर्थं वेदेपि न बोधयतीति भावादित्यर्थः ॥ अत्र शंकते ॥ शुक्लपटव

सां० भा०
१४

14

बीजवच्चेत् १० ननु स्वाभाविकस्याप्यपायो दृश्यते यथा शुक्लपटस्य स्वाभाविकं शौ-
क्ल्यं रागेणापनीयते यथा बीजस्य स्वाभाविक्यप्यंकुरशक्तिरग्निनापनीयते अतः शु-
क्लपटवद्बीजवच्च स्वाभाविकस्य बंधस्यापायः पुरुषे संभवतीति तदुच्छेदसाधनो-
पदेशः स्यादिति चेदिति सूत्रार्थः समाधत्ते शक्त्युद्भवानुद्भवाभ्यां नाशक्योपदेशः ॥११॥ उक्तदृ
तिरोभा तिरोभा ष्टांतयोरपि नाशक्यस्वाभाविकस्यापायोपदेशो लोकानां भवति कुतः शक्त्युद्भवाभ्यां उद्भवा
दृष्टांतद्वयेऽपि शौक्ल्यादेराविर्भाव वेव भवतः न तु शौक्ल्यांकुरशक्त्योरभावो विस्पर्थः
नन्वेवं पुरुषेऽपि दुःखशक्तितिरोभाव एव मोक्षोऽस्त्विति चेन्न दुःखासंतनिवृत्तेरेव
लोके पुरुषार्थत्वानुभवात् श्रुतिस्मृत्योः पुरुषार्थत्वसिद्धिश्च न तु दृष्टांतयोरिव ति-
रोभावमात्रस्येति किं च दुःखशक्तितिरोभावमात्रस्य मोक्षत्वे कृतादिष्वपि योगीश्वर एम०
१४

संकल्पादिनाप्यात्मस्वस्य मलबीजेऽपि वपुषि संभवे नानिर्मोक्षापत्तिरिति॥
स्वभावत्वे बंधनिराकरणनिमित्तेभ्यो विबंधमपाकरोतीति सत्यं जातेऽनंतु रूपवेङः स्वस्य
नैमित्तिकत्वे विज्ञानाकपाकेऽपि घटत्वं न घटेन ज्ञानागतावस्थस्य स्वरूपङः स्वस्य पा
वद्रूपभावित्वा दित्यभिप्रायेण नैमित्तिकत्वं निराक्रियते न कालयोगतो व्यापि
नो नित्यस्य सर्वसंबंधात् नापि कालसंबंधनिमित्तकः पुरुषस्य बंधः कृतः व्या
पिनो नित्यस्य कालस्य सर्वावच्छेदेन सर्वदा सकलाकलसकलपुरुषसंबंधात्॥ सर्वा
वच्छेदेन सदा सकलपुरुषाणां बंधापत्तेरित्यर्थः अत्र च प्रकरणे कालदेशाकर्मादीनां
निमित्तत्वसामान्यं नापलप्यते॥ श्रुतिस्मृतियुक्तिभिः सिद्धत्वात्॥ किंतु यन्नैमित्तिकत्वं पा
कजरूपादिवत् निमित्तजन्यत्वं तद्बंधे प्रतिषिध्यते पुरुषे बंधस्यौपाधिकत्वाभ्युपग

सां॰भा॰ १५ मात् ननु कालादिनिमित्तकत्वेपि सहकार्यंतरसंभवासंभवाभ्यां व्यवस्था स्यादिति चेत् एवं सति
यत्संयोगे सत्यवश्यं बंधस्तत्रैव सहकारिणि लाघवाद्बंधोस्त्वतः पुरुषे बंधव्यवहारस्सोपाधिक
त्वेनाप्युपपत्तेरिति गतं नैमित्तिकत्वेनेति" न देशयोगतोप्यस्मात् १२ देशयोगतोपि न बंधः
15
कुतः अस्मात्पूर्वसूत्रोक्तान्मुक्तामुक्तसर्वपुरुषसंबंधान्मुक्तस्यापि बंधापत्तेरित्यर्थः नाव
स्थातो देहधर्मत्वात्तस्याः १४ संघातविशेषरूपायावस्थानतन्निमित्ततोपि पुरुषस्य बंधः
कुतः तस्या अवस्थाया देहधर्मत्वादचेतनधर्मत्वादित्यर्थः अन्यधर्मस्य साक्षादन्यबंध
कत्वे अतिप्रसंगात् मुक्तस्यापि बंधापत्तेरित्यर्थः ननु पुरुषस्याप्यवस्थायां किं बाधकं तत्रा
ह असंगोयं पुरुष इति १५ इति शब्दो हेत्वर्थे पुरुषस्यासंगत्वात् अवस्थाया देहमात्र राम॰
धर्मत्वमिति पूर्वसूत्रेणान्वयः पुरुषस्यावस्थारूपविकारस्वीकारे विकारहेतुसंयोगाख्यः १५

संगः प्रसज्येतेति भावः असंगत्वे च श्रुतिः स यदत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसं
गो ह्ययं पुरुष इति संगमात्रं न भवति कालदेशसंबंधस्य पूर्वमुक्तत्वात् श्रुतिस्मृतिषु प
द्मपत्रस्य जलेनैव पद्मपत्रस्यासंगता या दृष्टांततयावगता तेन कर्मणामात्मधर्मत्वाद
तिप्रसक्तेश्च ॥ ९६ ॥ न हि विहितनिषिद्धकर्मणापि पुरुषस्य संबंधः कर्मणामनात्मधर्मत्वात्
अनात्मधर्मेण साक्षादसंबंधे च मुक्तस्यापि बंधापत्तेः न तु स्वस्वोपाधिकर्मणा बंधांगी
कारेणायं दोष इत्याशयेन हेत्वंतरमाह अतिप्रसक्तेश्चेति प्रलयादावपि दुःखयोगरू
पबंधापत्तेश्चेत्यर्थः सहकार्यंतरविलंबतो विलंबकल्पनं च प्रागेव निराकृतं न काल
योगः स्यादित्यत्र इति नन्वेवं दुःखयोगरूपोपि बंधः कर्मसामानाधिकरण्यानुरोधेन
चित्तस्यैवास्तु दुःखस्य चित्तधर्मतायाः सिद्धत्वात् किमर्थं पुरुषस्यापि कल्प्यत एवं बंध इ

सां॰ भा॰ १९

स्याशंकायामाह॥ विचित्रभोगानुपपत्तिरन्यधर्मत्वे १७ दुःखयोगरूपबंधस्यचित्तमात्रधर्मत्वे
विचित्रभोगानुपपत्तिः पुरुषस्य हि दुःखयोगं विनापि दुःखसाक्षात्काराख्यभोगस्वीकारे सर्वे
पुरुषदुःखादीनांसर्वपुरुषभोग्यतास्यान्नियामकाभावात् ततश्चायंदुःखभोक्ताऽयंचसु
खभोक्तेत्यादिरूपभोगवैचित्र्यंनोपपद्येतसर्वथा अतोभोगवैचित्र्योपपत्तयेभोगनियामक
तयादुःखादियोगरूपोबंधः पुरुषेपिस्वीकार्यः सचपुरुषेदुःखयोगः प्रतिबिंबरूपएवे
तिप्रागेवोक्तंप्रतिबिंबश्चस्वोपाधिष्वेतैरेवभवतीतिनसर्वपुंसांसर्वदुःखभोगप्रतिभावः
चित्तप्रतिबोधेपुरुषस्यानादिः स्वस्वामिभावः संबंधोहेतुरितियोगभाष्यादयंसिद्धंत
सिद्धंचित्तेचपुरुषस्यस्वत्वंस्वभक्तवृत्तिवासनावत्वमिति यत्तुचित्तस्यैवबंधमोक्षौनपुरु राम॰ १९
षस्येतिश्रुतिस्मृतिसुगीयतेतदुबिंबरूपदुःखयोगरूपंपारमार्थिकंबंधमादाययोध्यं

16

साक्षात्प्रकृतिनिमित्तकत्वमपि बंधस्यास्याकरोति प्रकृतिनिर्बंधनात्वेन तस्याप्यपि पारतंत्र्यं
१९ ननुप्रकृतिनिमित्ताद्बंधोभवत्विति चेन्न यतस्तस्याप्यपि बंधकत्वे संयोग पारतंत्र्यमग्रतस्त्व
वक्ष्यमाणमस्ति संयोगविशेषं विनापि बंधकत्वेप्रलयाद्यवपिदुःखबंधप्रसंगादित्यर्थः
प्रकृतिनिबंधनाद्वेदिति पाठेतुप्रकृतिनिर्बंधनाचेद्बंधनेसर्थः अतोयत्पारतंत्र्यात्प्रकृतिर्बंध
कारणंसंभवेत् तस्मादेव संयोगविशेषादौपाधिकोबंधोग्निसंयोगाज्जलौष्ण्यवदिति
स्वसिद्धांतमनेनैव प्रसंगेनांतरालएवधारयति न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्त
द्योगादृते १९ तस्मात्तद्योगादृते प्रकृतिसंयोगं विनान पुरुषस्य तद्योगोबंधसंपर्कोस्ति
अपितु स एव बंधं बंधस्यौपाधिकत्वलाभाय नतुयेनवक्रोक्तिः यदि हि बंधः प्रकृतिसं
योगजन्यः स्यात्स्फटिकजपारूपवत् तदा तद्बंधस्तद्योगेप्यनुवर्त्तेत नचवर्त्ततीयक्षणदर्शः

सा०भा०
१८

खनाशकत्वं कल्प्यं कारणनाशस्य कार्यनाशकतायाः क्लृप्तत्वेन तेनैवोपपत्तावस्माभिस्तदुक
स्मात् इति हि दुःखादेरुपादानं अतो दीपशिखावत् क्षणभंगुराया वृत्तेरस्तु विनाशित्वेनै
व तद्धर्माणां दुःखेच्छादीनां विनाशः संभवतीति अतः प्रकृतिवियोगे बंधाभावादौपाधिक
एव बंधो न तु स्वाभाविको नैमित्तिको वेति तथा संयोगनिवृत्तिरेव साक्षाज्ज्ञानोपायरस वि
वेकोक्तिफलं तथा च स्मृतिः यथा ज्वलद्गृहाच्छिष्टं गृहं विच्छिद्य रक्ष्यते तथा सदोषप्रकृति
विच्छिन्नो योगेन शोचतीति वैशेषिकाणामिव पारमार्थिको दुःखयोग इति अस्मोमाभद्धिसेत
दर्थंनिस्येसाप् यथा स्वभावशुद्धस्फटिकस्य रागयोगेन जपायोगं विना घटते तथैव
नित्यशुद्धस्वभावस्य पुरुषस्योपाधिसंयोगं विना दुःखसंयोगो न घटते स्वतो दुःखाद्य
संभवादित्यर्थः तदुक्तं सौरे यथा हि केवलो रक्तः स्फटिको लक्ष्यते जनैः रंजकाद्युपधाने

17

राम०
१८

न तद्धस्य रमशुरूपरक्षि नित्यत्वं कालानवच्छिन्नत्वं शुद्धादिस्वभावत्वं च नित्यशुद्धत्वादिकं
तत्र नित्यशुद्धत्वं सदा मायापुण्यस्पृष्टत्वं नित्यबुद्धत्वं ज्ञत्वगुणविदूनत्वं नित्यमुक्तत्वं सदापार
मार्थिकदुःखाद्युक्तत्वं प्रतिबिंबरूपदुःखयोगस्त्वपारमार्थिकोऽबंधरतिभावः आत्म
नो नित्यशुद्धत्वादौ च युक्तिः आत्मा तत्पासनमात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनो
विभुरित्यादिः ननु स्वमननश्रवणात्त्वाद्वत्रार्थे युक्तिरपि वक्तव्येति चेत्तत्सत्यं न तद्योगस्त
योगाद्धतरस्यनेन नित्यशुद्धत्वादौ युक्तिरयुक्तैव तथाहि आत्मनि नित्यत्वविभुत्वा
दिकं तावत्त्वयापादिदर्शने चैव साधितं तत्र नित्यस्य विभोरात्मनो यद्योगं विना दुःखा नुपादान
द्यखिलविकारयोगो न भवति तस्यैवांतःकरणस्य सर्वसंमतं करणत्वमेव युक्तं ला
घवात् सर्वविकारेष्वंतःकरणस्यैवान्वयव्यतिरेकाभ्यां च न पुनरंतर्विकारेषु मनसो

सां०भा०
१८

18

निमित्तत्वमात्मनश्चोपादानत्वं युक्तं कारणद्वयकल्पने गौरवात् न चाहं सुखी दुःखी करोमी
त्यनुभवादात्मनो विकारोपादानत्वसिद्धिरिति वाच्यम् अहं गौर इत्यादिभ्रमगतान्तं पातित्वे
नाप्रामाण्यं कस्यचिदिति तयोक्तप्रत्यक्षाणामुक्ततर्केणानुमानापेक्षया दुर्बलत्वात्॥
आत्मनश्चिन्मात्रत्वे तु मुक्तिरप्येव स्यादिति दिक्। अस्य सत्त्वस्यैवार्थः कारिकयाप्युक्तः तस्मा
त्तत्संयोगादचेतनं चेतनावदिव लिङ्गं गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः इति कर्तृत्व
मत्र दुःखित्वादिसकलविकारोपलक्षणं तस्मात् योगसत्त्वेप्यस्य सत्त्वस्यैवार्थ उक्तः॥ २०॥ द
र्शयोः संयोगो हेयहेतुः गीतायां च पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणानिति
प्रकृतिस्थः प्रकृतौ संयुक्तः तथा च श्रुतावपि आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण
इति न च कालादिवदेव प्रकृतिसंयोगोऽपि मुक्तपुरुषसाधारणतया कथं बंधहेतु

रामः
१८

न्या रितिवाच्यं जन्मापरनाम्नः स्वस्वबुद्धिभावापन्नप्रकृतिसंयोगविशेषस्यैवात्र संयोग
शब्दार्थत्वात् योगभाष्ये आसैस्तथाख्यातत्वात् बुद्धिरूपाधिनापुरुषेदृश्ययोगाच्च
वैशेषिकाद्युक्तस्वभोगजनकतावच्छेदकत्वेनातः कारणसंयोगेवैज्ञासंज्ञा स्वामिभिरपी
ष्टं अतोनसपुरुषादैवंधप्रसंगः स्वतंत्रस्वभुक्तवृत्तिवासनावत्वाद्युक्तं प्रत्येकंच दूषितत्वं
स्कारस्य चाहेयत्वानादित्वतः स्वस्वामिभावस्यैव स्थितिः कश्चित्तु प्रकृतिपुरुषयोः संयोगं
गीकारेद्रूपस्यपरिणाम संयोगीप्रसज्येयाताम् अतो नात्राविवेकएव योगशब्दा
र्थोऽनतु संयोग इति तन्न तद्योगोऽप्यविवेकादिति सूत्रेण विवेकस्य योगहेतुतावगत हेतुः
वसूत्रकारेणवक्ष्यमाणत्वात् स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः तस्य हेतु
रविद्येति सूत्राभ्यां पातंजलेऽपि संयोगहेतुत्वस्यैवाविद्याया उक्तत्वाच्च किंचविवेकाभाव

सां॰भा॰ १९ रूपस्याविवेकस्यसंयोगत्वेप्रलयादावपिप्रकृतिपुरुषसंयोगसत्वेनभोगाद्यापत्तिः मिथ्याज्ञान दि
रूपस्याविवेकस्यचसंयोगत्वेआत्माश्रयः पुंप्रकृतिसंयोगस्याज्ञानादिहेतुत्वात्तस्माद्वि
वेकातिरिक्तोयोगोवक्तव्यः सचसंयोगएवान्यस्याप्रमाणिकत्वात् संयोगश्चनपरिणामः
सामान्यगुणातिरिक्तधर्मोस्यस्यैवपरिणामित्वव्यवहारात् अन्यथाकूटस्थस्यसर्वगत
19 त्वरूपविभुत्वानुपपत्तेः नापिसंयोगमात्रंसंगः परिणामहेतुसंयोगस्यैवसंगशब्द
र्थतयाउक्तत्वादिति ननुतथापिकूटस्थनित्ययोःप्रकृतिपुरुषयोर्महदादिहेतुरनित्यः सं
योगोघटतेतिचेत् प्रकृतेःपरिच्छिन्नापरिच्छिन्नत्रिविधगुणसमुदायरूपतयापरिच्छिन्न
चित गुणावच्छेदेनपुरुषसंयोगोत्पत्तेः संभवात्श्रुतिस्मृतिसिद्धत्वात्प्रकृतिसंयोगक्षोभ राम॰
योरिति एतच्चयोगवार्तिकेप्रपंचितमस्माभिः अपरस्तुभोग्यभोक्तृयोग्यतैवानयोः संयो १९

गद्रस्तद् तदपि न यौगपद्यापातित्वतत्त्वे ज्ञाननिवर्त्यत्वानुपपत्तेः अनित्यत्वे किमपराद्धं संयोगे
न परिणामित्वापत्तेः समानत्वात् भोग्यभोक्तृयौगपद्याया संयोगरूपत्वस्य सत्त्वादिघ्न
क्तत्वेन प्रामाणिकत्वाच्चेति तस्मात्संयोगविशेष एवात्र बंधाख्यो हेयहेतुस्तथा सूत्रकारा
भिप्रेत इति स्वपक्षं बंधहेतुरवधारितः इदानीं नास्तिकाभिप्रेता अपि बंधहेतवो निराक
र्तव्याः तत्र षड्भिक्षो दृष्टावलोकपवादी विनायक इति अनुशासनाक्षिप्तसिद्धः क्ष
णिकविज्ञानात्मवादिनो बौद्धप्रभेदा एवमाहुः नास्ति प्रकृत्यादि बाह्यं वस्तु येन तत्सं
योगादौपाधिकस्तात्त्विको वा बंधः स्यात् किन्तु क्षणिकविज्ञानमात्रमद्वितीयं तत्त्वं
अमस्तं सर्वं सांवृतिकं संवृतिश्चाविद्या मिथ्याज्ञानाख्या तत एव बंध इति तथा चैते सां
अविन्नोपिहि बुद्ध्यात्मा विपर्यासनिदर्शनैः ग्राह्यग्राहकसंवित्तिभेदवानिव ल

सं॰ भा॰
२०

20

स्यतरति तन्न तमादैतन्निराक्रियते नाविद्यातोपि अयस्तु नाबंधापायोगात २० अविद्याद्यः पूर्वोक्त
कालाद्यपेक्षया अविद्यातोपि न साक्षाद्बंधप्रयोगः अद्वैतवादिनां तेषां मविद्यातोपि न साक्षा
द्बंधप्रयोगः अद्वैतवादिनां तेषामविद्याया अप्यवस्तुत्वेन तयाबंधानौचित्यात् नहि स्वाप्नर
ज्वाबंधनं दृष्टमिति सर्पः बंधोप्यवास्तव इति चेन्न स्वप्नं सत्त्रकारेण निराकरिष्यमाणत्वाद्
सामानाद्वैतश्रवणेतरं बंधनिवृत्तये योगाभ्यासाभ्युपगमविरोधाच्च बंधमिथ्यात्वश्रवणे न बं
धनिवृत्त्यर्थस्य फलसिद्धत्वनिश्चयात तदर्थं वक्ष्यमाणसमाध्ययोगांगानुष्ठानासंभवादि
ति वस्तुत्वे सिद्धांतहानिः २१ यदि वाविद्याया वस्तुत्वं स्वीक्रियते तदा स्वाभ्युपगतस्या
विद्यातुच्छत्वस्य हानिरिति सर्पः विजातीयद्वैतापत्तिश्च २२ किंचाविद्याया वस्तुत्वे क्षणि
कविज्ञानसंतानाद्विजातीयं द्वैतं प्रसज्येत तत्रैव भवतामनिष्टमिति सर्पः संतानांतःपातित्व

राम॰
२०

ज्ञानामानंसात्सजातीयद्वैतमिथ्यात एवेत्याशयेन विजातीयेति विशेषणं ननु अविद्याया
अपि ज्ञानविशेषत्वात् अविद्यमापि कथं विजातीयद्वैतमिति चेन्न ज्ञानरूपाविद्याया
बंधोत्तरकालीनतया वासनारूपाविद्याया एव तैर्बंधहेतुत्वाभ्युपगमात् वासनात्म
नात् विजातीयैवेति एभिश्च सूत्रैर्न समीमांसासिद्धांतो निराक्रियत इति भ्रमो न क
र्त्तव्यः न समीमांसायां केनापि सूत्रेण विद्यामात्रतो बंधस्यानुक्तत्वात् अविभागो
वचनादित्यादिसूत्रैर्न समीमांसया अभिप्रेतस्याविभागलक्षणाद्वैतस्य अविद्या
दिवास्तवत्वे व्यविरोधाद्येपत्तेर्वेदांतिनु वा एतेना माध्यनिकस्य मायावादस्यात्र लिं
गं दृश्यते तत्तेषामपि विज्ञानवादैकदेशितया कमेव मायावादमसच्छं स्वंसम्य
क्तं बौद्धमेव वचमयैव कथितं देविकलौ ब्राह्मणरूपिणेत्यादि पद्मपुराणस्य श्रुतिन

सां॰ भा॰
२१

21

वाक्यपरंपराभ्यः नन्वेतद्वेदांतमतं वेदार्थवन्महाशास्त्रं मायावादमवैदिकमिति तद्वाक्य
शेषे बाधितमिति मायावादिनोऽत्रवचनसाक्षात्प्रतिवादित्वं विज्ञानीयेति विशेषणमेवैवपश्यात् ॥
मायावादिसजातीयत्वेनास्मान्भ्युपगमादिति तस्मादत्र प्रकरणे विज्ञानवादिनां बंध
हेतुव्यवस्थैव साक्षान्निराक्रियते नत्वेवं वशीरस्मान्नवीनानामपि प्रच्छन्नबौद्धानां मा
यावादिनामविद्यामात्रस्यैं श्रुकृस्वबंधहेतुत्वं निराकृतं वेदितव्यं अस्मिन्मते त्ववि
द्यायाः कूटस्थनित्यतारूपपारमार्थिकसत्त्वाभावेऽपि घटादिवद्वास्तवत्वेन वक्ष्यमाण
संयोगद्वारा बंधहेतुत्वेऽप्युक्तबाधानवकाशः एवं योगमतेऽन्यसमीमांसामतेऽपी
तिशंकितं विरुद्धोभयरूपाचेत् २३ ननु विरुद्धं पदुभयं सदसच्छाब्दे सद्विलक्षणमवि सदसद्विलक्षणं वा तद्रूपं वा
द्यावत्कल्पनानोनानमायापारमार्थिकद्वैतभंगइतिचेदिसर्गः॥ स्वयं तु सदसत्त्वं प्रपं

राम॰
२१

चस्य वस्तुनि तत्र सत्वासत्वे अनेकानेकत्वरूपत्वात् विरुद्धे एव न भवत इति सूचयितुं वि
रूढपदेपादानं परिहरति नानाहंकयपरापर्या प्रतीतेः २४ सुगमं अविद्या विद्यायाः
साक्षादेव दुःखयोगाख्यबंधहेतुत्वेज्ञाननाममविद्यास्यानंतरं प्रारब्धभोगानुप
पत्तिः बंधपर्यायस्य दुःखभोगस्य कारणनाशादिति अस्मदादिमतेपि नायं दोषः
संयोगद्वारैवाविद्याकर्मादीनां बंधहेतुत्वात् जन्मारम्भकस्य संयोगः प्रारब्धसमा
प्तिं विना न नश्यतीति पुनः शंकते नवपंचषट्पदार्थवादिनो वैशेषिकादिवत् २५
नन्वैशेषिकाद्यास्तिकवन्नवपंचषट्षोडशादिनियतपदार्थवादिनः अतो मतितोपि
सदसदात्मकः सदसद्विलक्षणो वा पदार्थः विशेषस्य पेयमितिभावः परिहरति
अनियतत्वेपि न यौक्तिकस्य संग्रहोऽन्यथा बालोन्मत्तादिसमत्वं २६ पदार्थेति

सां॰ भा॰ २२

यमो मास्तु तथापि भावाभाव विरोधेन युक्ति विरुद्धस्य सदसदात्मक पदार्थस्य संग्र

हो भवद्वचनमात्राच्छिष्याणां न संभवति अन्यथा पालकाद्युक्तस्याप्ययौक्तिकस्य

संग्रहः स्यादिस पर्थः [ति] स्कसादिकं चास्मिन्नर्थे स्फुटं नास्ति युक्तिविरोधेन च संदिग्ध

स्कतेरर्थांतरसिद्धिरिभावः नासद्रूपा न सद्रूपा मायानैवोभयात्मिका सदसभ्या

मनिर्वाच्या मिथ्याभूता सनातनी स्यादि सौराद्ध्वाकारानां त्वयमर्थः विकारजननी

मायामष्टरूपामजां ध्रुवामित्याद्युक्तिसिद्धमायाख्या प्रकृतिः परमार्थसती

न भवति एवं पर्वविकाररूपैः प्रतिक्षणमपायात् नापि परमार्थाऽसती भवति अर्थ

क्रियाकारित्वेन शशशृंगाविलक्षणत्वात् नापि तदुभयात्मिका विरोधात् अतः स

दसभ्यामनिर्वाच्यासत्येवेति असत्येवेति च निर्धारणोपदेशुमशक्या किंतु मिथ्याभू

राम॰ २२

22

तीपरिणामिनित्यताहूपव्यावहारिकसत्वव ॥१॥

तात्पर्यमात्मावहारिकासत्त्वंतीचेति एतद्वाग्ग्भगवंच धिप्यामहूतिद्विकूंपत्तमकार्लोपम्न
स्तानिच सर्वाण्येवहूबल्लानिज्ञाधुनिकैर्पिमाकवादैर्योजनीयानिस्र्पपरेनास्तिकाःस्राः
श्ल एककाबास्वविबधाःसंति तेषांवासनयाजीवस्यबंधर तितद्विहूपत्तिंनानाद्वि
षयोपरागनिमित्तोपस्य २७ अस्यात्मनःप्रवाहहूपेणानादिर्वासिवंधवाहनात्तन्नि
मित्तकोविबंधोनसंभवतीसर्भीः निमित्ततोप्यस्येतिपाठःलुसमीचीनःअत्रहेतुमाह।
नवाह्याभ्यंतरयोरूपरज्योपरंजकभावोपिदेशव्यवधानात सूक्ष्मस्यपाठलिंगत्रयस्यप्य
रिव २८ तन्मतेपरिच्छिन्नोदेहांतःस्थएवात्मातस्याभ्यंतरस्यनवासविषयेणसहोपर
ज्योपरंजकभावोपिसंभवतिकुतःसूक्ष्मस्यपाठलिंगत्रयस्यपोरविदेशव्यवधानाद्वि
र्भीः संयोगेह्यस्येवहिवासनात्म्य उपरागो हृक्षः व्याप्यामंजिष्ठावस्त्रयोः यथावाबुव्यस्फ

सां० भा०
२३

रिक्तयोरिति अपि शङ्केन स्वमतेऽपि संयोगादिः समुच्चीयते स्रुघ्नपाटलिपुत्रौ देशविशेषौ
न तु भवतामिंद्रियाणामिवास्माकमात्मनो विषयदेशे गमनाद्विषयसंयोगविषयोपरा
गो व्यक्तमस्त्यात्माहं द्वयोरेकदेशालब्धोपरागान्नव्यवस्था २७ द्वयोर्व्यक्तात्मनोरेक
स्मिन् विषयदेशे लब्धविषयोपरागान्नवंधमोक्षव्यवस्था स्यात् मुक्तस्यापि वंधापत्ति
रित्यर्थः अत्र शंकते अदृष्टवशाच्चेत् २८ नन्वेकदेशसंबंधेन विषयसंयोगसाम्ये
प्यदृष्टवशादेवोपरागलाभ इति चेदित्यर्थः परिहरति न द्वयोरेककालायोगादुपकार्यो
पकारकभावः २९ न कर्तृनिष्ठादृष्टानि भोक्तृनिष्ठे विषयोपरागः संभवतीत्यर्थः
शंकते पुत्रकर्मवदिति चेत् न तु यथा पितृनिष्ठेन पुत्रकर्मणा पुत्रस्योपकारो भवति तद्वद
धिकरणेनैवादृष्टेन विषयोपरागः स्यादित्यर्थः दृष्टांतासिद्ध्या परिहरति नास्ति ह राम०
२३

23

तत्र स्थिर एकात्मा यो गर्भाधानादिना संक्रियते पुत्रेऽपि तन्मते पुत्रस्योपकारेण घटते ।
दिति यस्मात्तत्र तन्मते गर्भाधानमारभ्य जन्मपर्यंतं स्थायी एक आत्मा नास्ति यो जन्मोत्तरकाली
नकर्माधिकारार्थं पुत्रेष्या संक्रियेतेति दृष्टांतस्याप्रसिद्धिरित्यर्थः अस्मन्मते तु स्थैर्या
भ्युपगमात्तत्राप्यदृष्टसामानाधिकरण्यमेवास्ति पुत्रेष्याजनितेन पुत्रोपाधिनिष्ठादृष्टेनै
व पुत्रोपाधिद्वारा पुत्रस्योपकारादिस्तस्मन्मते पि दृष्टांतासिद्धिरितिभावः ननु वंशस्यापि
क्षणिकत्वादपि यतः कारणकोऽभावकारण एक एव वंशोऽस्ति सा शापेनापरो नास्ति कः स
स्यवतिष्ठते स्थिरैकात्मासिद्धेः क्षणिकत्वं वंशस्येति शेषः भावस्तु क एव अत्रायं प्रयोगः
विवादास्पदं वंशादि क्षणिकं सत्वात् दीपशिखादिवदिति न च घटादौ व्यभिचारः तस्या धा
पि पक्षसमत्वात् एतदेवोक्तं स्थिरैकात्मासिद्धेरिती समाधत्ते न प्रत्यभिज्ञावान् एक

सां॰ भा॰ २४ स्याद्विक्षणिकत्वमितिशेषः यदेवाहमद्राक्षं तदेवाहं स्पृशामीत्यादिप्रत्यभिज्ञायाः स्थैर्यसि
द्धेः क्षणिकत्वस्य बाधात् प्रत्यभिज्ञानेत्यर्थः तद्यथा वंध्यादेः स्थिरं सत्वात् घटादिवदिति
अस्मन्मत एवानुकूलतर्कसत्वेनानसत्त्वमिति पत्ता तान्न दीपादौ च सत्त्वमनेकक्षणत्वान्नाकल
नेन क्षणिकत्वेऽस्माकमेव परेषामिति श्रुतिमात्रविरोधाच्च सदेव सौम्येदमग्र आसीत्तम
24
एवेदमग्र आसीदित्यादिश्रुतिभिः कथमसतः सज्जायेतेत्यादिश्रौत्याद्युक्तिभिश्च कटं
दृगिकत्वासिद्धेश्च न सत्का[illegible]कारणात्मकाखिलप्रपंचे क्षणिकत्वानुमानस्य विरोधान्न क्षणिकत्वमित्यर्थः
दृष्टान्तासिद्धेश्च प्रदीपशिखादिदृष्टान्तेऽपि क्षणिकत्वानुमानमित्यर्थः किंच क्षणिकता
वादिनां मृदादेस्तलेऽपि कार्यकारणभावः प्रवृत्तिनिवृत्त्यन्यथानुपपत्तिसिद्धो नो एमं॰
पपद्येतेत्याह उपजायमानयोर्नकार्यकारणभावः किंतूपजायमानयोः २४

कार्यकारणभावः किंवा क्रमिकयोः तत्रनाद्यो विनिगमकाभावादिष्परतिभावः नांत्यस्तस्या
ह पूर्वापरयोरुत्तरत्वे योगात् पूर्वस्य कारणस्यापायकाले उत्तरस्य कार्यस्योत्पत्तेर्नोचि
स्यादविनष्टत्वादसंभवति कार्यकारणभावः उपादानकारणानुगततयैव कार्यत्व
भवादिसर्थः उपादानकारणमधिकृत्यैवैतद्दूषणं तत्राह नन्वावैतदयोगादुभय
व्यभिचारादपि नैवतः पूर्वस्याभावकाले उत्तरस्यासंबंधः अतउभयव्यभिचारादन्व
यव्यतिरेकव्यभिचारादपि न कार्यकारणभावस्त्वर्थः न ह्यहि यदा उपादेयोत्पत्तिः
तदा उपादानं यदा चोपादानाभावस्तदोपादेयोत्पत्तिसंभावस्तत्रान्वयव्यतिरेकेणैवोपा
दानोपादेययोः कार्यकारणभावग्रहोभवति तत्र क्षणिकत्वेन क्रमिकयोस्तयोर्विरु
द्धकालतयाऽन्वयव्यतिरेकव्यभिचाराभ्यां न कार्यकारणभावसिद्धिरिति ननु नि

मित्तकारणस्यैवोपादानकारणस्यापि पूर्वभावमात्रेणैव कारणतास्त्वत्राह पूर्वभावमात्रे
न नियमः पूर्वभावमात्राभ्युपगमे च इदमेवोपादानमिति नियमो न स्यात् निमित्तका
रणानामपि पूर्वभावाविशेषात् उपादाननिमित्तयोर्विभागः सर्वलोकसिद्धः स्पष्टः
अपरे तु नास्तिका आहुः विज्ञानातिरिक्तवस्त्वभावेन बन्धोऽपि स्वप्नपदार्थवत् अतो विज्ञानमात्रं
संतमिथ्यात्वेन न तत्र कारणमस्तीति तन्मतमपाकरोति न विज्ञानमात्रं बाह्यप्रतीतेः
न विज्ञानमात्रं तत्त्वं बाह्यार्थानामपि विज्ञानवत्प्रतीतिसिद्धत्वादित्यर्थः ननु लाघ
वतर्केण स्वप्नादिदृष्टदृष्टत्वहेतुकमिथ्यात्वानुमानेन बाह्यवस्त्वनुभवो बाधनीयः
अत्र च भवतां श्रुतिस्मृती अपि स्तः विश्वमिदं सर्वं तस्मात् विज्ञानमेवास्ति न प्रपं
चो न संसृतिरित्याद्या इत्यतो दूषणान्तरमाह तदभावे तदभावाच्छून्यं तर्हि तर्हि

बाह्याभावे शून्यमेव प्रसज्येत न तु विज्ञानमपि कुतः तदभावे तदभावात् बाह्याभा
वे विज्ञानस्याप्यभावप्रसंगात् विज्ञानप्रतीतेरपि बाह्यप्रतीतिवदवस्तुविषयत्वानु
मानसंभवात् ज्ञानप्रामाण्यस्यैकाप्यसिद्धत्वाच्च तथा विज्ञाने प्रमाणनामपि
बाह्यवत्प्रलापाच्चेत्यर्थः ननु अनुभवैकस्यापि विवादाभावेन नास्ति तत्र प्रमा
णापेक्षेति चेन्न शून्यवादिनामेव तत्र विवादात् अथाऽसतापि प्रमाणेन वस्तुसिद्ध्य
ति विषयाबाधस्यैव प्रमाणप्रयोजकत्वात् ननु प्रमाणपारमार्थिकत्वस्येति चे
न्न एवं सति असत्प्रमाणस्य सर्वत्र सुलभत्वेन कस्याप्यर्थे प्रमाणान्वेषणस्यायोगा
त् अथ यासत्त्वेऽपि व्यावहारिकसत्त्वरूपो विशेषः प्रमाणे द्रष्टव्य इति चेत् ॥
आयातं मार्गे किं तन्नाम व्यावहारिकत्वं मदुपराणामित्वं तदस्माभिरपीष्ट्या

सां॰ भा॰
२६

26

मेव सत्त्वं ग्राह्यग्राहकसमानानां दृष्टं श्रुतिभिरजडतादितुल्यत्वस्यैव सप्रपंचे स्माभिः प्रतिषे
धात्‍ यदि तु नः प्रतीयमानतामात्रं तत्तदापि तादृशैरेव समानैर्वीक्षार्थस्यापि सिद्धिः प्र
संगात्‍ लाघवतर्कानुगृहीतेन यथाक्रमं चिदनुमानेन बाधस्तु विज्ञानेपि समान
इति एतेनाधुनिकानां वेदान्तिब्रुवाणामपि मतं विज्ञानवादतुल्ययोगक्षेमतया
निरस्तं विज्ञानमात्रस्य सत्ताप्रतिपादकश्रुतिस्मृतयस्तु कूटस्थत्वरूपां पारमार्थि
कसत्तामेव बाह्यानां प्रतिषेधंति न तु परिणामित्वरूपां व्यावहारिकसत्तां यत्तु काला
तरेणापि नाशसंभावनामपेक्षितैं परिणामादिसंभवांतदस्तु न पतद्वत्किं वस्तु कणेति
यद्यत्कोके यत्ते राजमध्ये कं तथाप्यव्यञ्जतेसत्तु न सत्त्वं कल्पनामयमिति विष्णुपुरा
णादिषु परिणामित्वस्यैव सत्तावागमादिति संकल्पनामयमेव स्वराज्येसंकल्प

सां० भा०
२६

रचितं ॥ एतेन विज्ञानमयमेवैतद्द्वैधमवगच्छते साधिना विभ्रमरूपेण मायामोहरूपिणा
विष्णुनाऽसुरेभ्यो पितत्वमेवोपदिष्टं ॥ तेनाऽनधिकारिदेवैर्विपरीतार्थग्रहणे
न विज्ञानवादिनो नास्तिका बभूवुरिति सर्वगतत्वं ॥ तदेतत्सर्वं न समीमांसाभाष्ये मा
यावादनिरसनप्रसंगतो विस्तारितमस्माभिः ॥ नन्वेवं भवतु शून्यमेव तत्त्वं तथा तु
तरामेव बंधकारणं नैव बंधं न मुक्तं तु दृष्टादिति नास्तिकशिरोमणेः प्रसवति ह
ते ॥ शून्यं तत्त्वं भावो विनश्यति वस्तुधर्मत्वाद्विनाशस्य ॥ शून्यमेव तत्त्वं यतः सर्वो
पि भावो विनश्यति यश्च विनाशी स मिथ्या स्वप्नवत् ॥ अतः सर्ववस्तुनामाद्यंत
योरभावमात्रत्वान्मध्ये क्षणिकत्वं सांवृतिकं न पारमार्थिकं वंध्यादि ॥ ततः किं
केन वध्यते स्म शून्यः भावानां विनाशित्वे हेतुर्वस्तुधर्मत्वाद्विनाशस्येति विशेषस्य ना

सां· भा·
२७

27

वस्तुस्वभावत्वात्स्वभावं तु विहाय न पदार्थस्तिष्ठतीत्यर्थः परिहरति अपवादमात्र
मबुद्धानां भावत्वाद्विनाशित्वमिति मूढानां अपवादमात्रं मिथ्यावाद एव नाशकार
णाभावेन निरवयवद्रव्याणां नाशासंभववात् कार्याणामपि विनाशासिद्धेश्च
घटो जीर्ण इति प्रत्ययैर्देवघटेती तेरस्मादिप्रतीत्या घटातीतावस्थायामेव स्यापा दे र ४
एवासिद्धेः अथ प्रकृतावप्यस्य कार्यतत्त्वताभ्युपगमे स्वमतप्रवेश एवाकिंचिद्विना
शस्यप्रपंचतत्त्वताभ्युपगमेपि विनाश एव बंधस्य पुरुषार्थः संभवत्येवेति क
श्चित्तद्व्याचष्टे अस्मत्तत्त्वमित्यस्मानां कुत्सितवाद्मात्रं न पुनरत्र युक्तिरस्ति प्रमा
णसत्त्वासत्त्वविकल्पासहत्वात् अस्य प्रमाणांगीकारे तेनैव अस्य सत्ताक्षतिः अ रा म०
नंगीकारे प्रमाणाभावादस्य असिद्धिः स्वतःसिद्धौ च चिद्रूपतापत्तिरित्यर्थः २७

इति ॥ न च न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा प
रमार्थता ॥ सर्वशून्यं निरालंबं स्वरूपं यत्र चिंत्यते अभावयोगः स प्रोक्तो येनात्मानं
प्रपश्यतीति श्रुतिस्मृतिभ्यामपि शून्यं तत्त्वतया प्रतिपाद्यत इति वा ध्येयं पुरूषाणां तत्र
निरोधाद्यभावस्यैव तादृशी श्रुतिः श्रुतस्यैवोक्तत्वात् पूर्वोत्तरवाक्याभ्यां शून्यस्यै
व प्रकारेण तद्विलीनविश्वचिदाकाशस्यैव तादृशस्मृतिभ्यां तत्त्वतः प्रतिपादना
च त्रैलोक्यं गगनाकारं नभस्तुल्यं वपुः स्वकं विपश्यामि मनो ध्यानं न योगान्न सैव
गोपन्नरसाद्द्वाक्यांतरैकवाक्यत्वात् आकाशशून्ययोः पर्यायत्वादिति मनो
महत्तत्त्वाद्यविलीनकारणं च विपश्यामि चिदाकाशे लीनं दृष्टांतरमाह उभ
यपक्षसमानक्षेमत्वादयमपि पक्षणि कुर्वात्य विज्ञानो भयपक्षयोः समानक्षेम

सां॰ भा॰ २८

28

त्वात्तुल्यनिरसनहेतुकत्वादयमपि पक्षोऽपि न युक्त इत्यनुषंगः क्षणिकपक्षनिरास
हेतुर्हि प्रत्यभिज्ञानुपपत्त्यादिः अन्यवादिभिः समानः तथा विज्ञानपक्षनिरासहेतुर्हि बाह्य सहे
प्रतीत्यादिहेतुरप्यत्र समान इत्यर्थः यद्यपि दुःखनिवृत्तिरूपतयाऽतत्साधनतया
वाऽन्यत्वैवास्तु पुरुषार्थः इति तैर्मन्यते तदपि दुर्घटमित्याह अपुरुषार्थत्वमुभ
यथाउभयथाऽस्वतः परतश्चान्यतया पुरुषार्थत्वेन संभवति स्वनिष्ठत्वेनैव सु
खादीनां पुरुषार्थत्वात् स्थिरस्य पुरुषस्यानभ्युपगमादित्यर्थः तदेवं बंधका
रणविषयेनास्तिकमतानि दूषितानि इदानीं पूर्वं निरस्तानपि श्लिष्टान्यास्तिकसंभा
व्यान्यप्रमाणि बंधकारणानि निरस्यन्ते नगतिविशेषात् प्रकरणं बंधो लभ्यते न
गतिविशेषात् शरीरप्रवेशादिरूपाद्विपुरुषस्य बंधर इत्यर्थः अत्र हेतुमाह नि राम॰ २८

क्रियस्य तदसंभवात् निष्क्रियस्य विभोः पुरुषस्य गत्यसंभावादित्यर्थः ननु श्रुति स्मृ
त्योः इह लोकं परलोकं गमनागमनश्रवणात् पुरुषस्य परिच्छिन्नत्वमेवास्तु तथा च श्रु
तिरप्यंगुष्ठमात्रः पुरुषोंतरात्मेत्यादिः सांशं कायाकारेति मूर्तत्वाद्घटादिवत्तस्मा
न्नधर्मापन्नावयवसिद्धिरतः यदि च घटादिवदुपमानमूर्त्तेः परिच्छिन्नः स्यात्क्षिपतेत
दासावयवत्वकिनाच्छिलादिना घटादिसमानधर्मापन्नावयवसिद्धिरतः स्यादित्यर्थः
गतिश्रुतिमुपपादयति गतिश्रुतिरुपाधियोगादाकाशवत् यथा च गतिश्रुति
रपि पुरुषे स्ति सा विभुत्वश्रुतिस्मृतिप्रमाणतो घटाकाशस्येवोपाधियोगादेव मन्त
व्येत्यर्थः तत्र च प्रमाणं घटसंवृतमाकाशं नीयमाने घटे यथा घटो नीयेत नाका
शं तद्वज्जीवो नभोपमः बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोपि दृष्ट ९९

सां॰भा॰
२७

29

साद्दिश्रुतिः नित्यः सर्वगतः स्थाणुरित्यादिस्मृतिश्च मध्यमपरिमाणत्वे सावयवत्वा
पत्त्या विनाशित्वं अणुत्वे च देहव्यापिसुखाद्यनुपपत्तिरित्यादियुक्तिश्चेति अत एव
प्रकृतिः कुरुते कर्म शुभफलात्मकं प्रकृतिश्च तदश्नाति त्रिषु लोकेषु कामगा इत्या
दिस्मृतिभिः प्रकृतेरेव विशिष्टक्रियारूपा गतिः स्मर्यत इति न कर्मणाप्यतद्धर्म
त्वात् कर्मणा अदृष्टेनापि साक्षात्पुरुषसंबंधः कुतः पुरुषधर्मत्वाभावादित्य
र्थः एवं विहितनिषिद्धव्यापाररूपेण कर्मणा बंधो निराकृतः अत्र तु तज्जन्यादृ

केशवा

ष्टेने सार्धिक्कविंभागाद्द्वपौनरुक्त्यं न त्वस्य धर्मेणाप्यस्य संबंधः स्यात्तत्राह अति
प्रसक्तिरन्यधर्मत्वे वं धतत्कारणाबोभिन्नधर्मत्वे अतिप्रसक्तिर्मुक्तस्यापि बंधाप
त्तिरित्यर्थः किं बहुना स्वभावादिकर्मान्तैरमिनवाकेनापि पुरुषसंबंधोत्पत्तिर्न घ एमः
२७

इतिश्रुतिविरोधादिति साधारणं बाधकमाह निर्गुणत्वादिश्रुतिविरोधश्चेति पुरु
षबंधस्यानौपाधिकत्वे साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिविरोधश्च स
र्थः इति शास्त्रे बंधहेतुपरीक्षा समाप्ता॰ तदेवं स्वभावतो बंधस्येत्यादिनामघट्ट
केनेतरप्रतिषेधतः प्रकृतिपुरुषसंयोग एव साक्षाद्बंधहेतुरवधारितस्तत्रेय
माशंका ननु प्रकृतिसंयोगोपि पुरुषे स्वाभाविकत्वादिविकल्पग्रस्तः कथं न
भवति संयोगस्य स्वाभाविकत्वकालादिनिमित्तकत्वे हि मुक्तस्यापि बंधापत्तिरि
त्यादिदोषाः प्रधानसंयोगेपि समाना एवेति तामिमामाशंकां परिहरति तद्योगोप्यविवेका
न्न समानत्वं पूर्वोक्तस्तद्योगोपि पुरुषस्याविवेकाद्दृष्टप्रमाणाद् अविवेकादेव हि निमि
त्तात्संयोगो भवति अतो नोक्तदोषाणां समानत्वमस्तीत्यर्थः सचाविवेको मुक्तेषु

१

सां॰भा॰ ३०

नास्तीति न तयोः पुनः संयोगो भवतीति ननु अविवेकोऽत्र प्रकृतिपुरुषाभेदसाक्षात्का
रः संयोगकारणसत्वात् किंतु विवेकप्रागभावो विवेकख्यज्ञानवासनावा तदुभय
मपि न पुरुषधर्मः किंतु बुद्धिधर्म एव स च धर्मिणोऽत्र संयोगेऽतिप्रसंगदोषसा
म्यमस्त्येवेति चेत् मैवं विषयतासंबंधेनाविवेकस्य पुरुषधर्मत्वात् तथा च
प्रकृतिर्बुद्धिरूपा सती यस्मै स्वामिपुरुषायात्मानं विविच्य न दर्शितवती स्ववृत्ति
दर्शनार्थं तस्मै यद्बुद्धिरूपेण तत्रैव रूपे संयुज्यत इत्यवस्थायाति प्रसंगाभा
वात् तदुक्तं कारिकयां पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य पंग्वंधव
दुभयोरपि संयोगस्तत्कृतः सर्ग इति स्वामिने पुरुषप्रधाने दर्शितुं तयोः कैव
ल्यार्थं च सर्गः अविवेकस्य वृत्तिरूपत्वं तु वासनात्वं न तु तत्वं चित्तस्थितेरस्या गा

च प्र

30/1

रा॰म॰ ३०

मिस्तत्रैवव्यवस्थां वक्ष्यामः अविवेकश्च संयोगद्वारैव बंधकारणं मलमेवं व्यादर्शि
नात् अविवेकनाशेपि जीवन्मुक्तस्य दुःखभोगदर्शनाच्च अतः साक्षादेवावि
वेको बंधकारणं प्राप्नोति। ननु भोग्यभोक्तृभावनियामकत्वेन तृप्तस्वस्थानादिस्व
स्वामिभावस्य कर्मादीनां वा संयोगहेतुत्वमस्तु किमित्यविवेकोपि संयोगहेतुरि
ष्यत इति चेन्न पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान्
कारणं गुणसंगोस्य सदसद्योनिजन्मसु इति गीतायां संगाख्याभिमानस्य संयोग
हेतुत्वस्मरणात् वक्ष्यमाणदिवाकरयुक्तिभ्यश्चान्यथाज्ञानतो मोक्षस्य श्रुति
स्मृतिसिद्धस्यानुपपत्तेश्च अथैवमपि स्वोपाधिकर्मादिकमपि संयोगकार
णं भवति तद्रूपकस्य मम विवेक एव केवलं तत्र कारणमुच्यत इति उच्यते॥

सा॰ भा॰
३०

अविवेकापेक्षया कर्मादीनामतिपरंपरयैव पुरुषसंबंधः तथाविवेक एव पुरुषेण
साक्षाद्धेतुं शक्यते कर्मादिकं त्वविवेकाख्यहेतुसिद्धेः इत्याशयेनाविवेक एव
मुख्यतः संयोगहेतुतयोक्त इति अयं चाविवेको गृहीतासंसर्गकमुभयप्रतानम
विद्यास्थलाभिषिक्त एव विवक्षितः विपर्ययाद्बंधः विपर्ययभेदाः पंचैवास्यागामि
सूत्रद्वयात्तस्य हेतुरविद्येति योगसूत्रेप्यविद्याया एव पंचपर्विकाया बुद्धिपुरुष
संयोगहेतुतावचनाच्च ॥ अस्य पारख्यासनमुपागममात्र एव योगतोत्र विशेषो
विस्पष्ट नपुनरविवेकोत्राभावमात्रं विवेकप्रागभावो वा मुक्तस्यापि बंधापत्तेः
जीवन्मुक्तस्यापि भाविविवेकप्रागभावेन धर्माधर्मोत्पत्तिद्वारा पुनर्बंध
प्रसंगाच्च तथागामिसूत्रस्य ध्वांतदृष्टांतानुपपत्तेश्च अभावस्य ध्वांतवदप

ए म॰
३०

30
/2

एकत्वासंभवात् तथाच बुद्धिरूपसावविद्याविवेकस्य श्रवमात्रीनो ११ घते यान्तामिति
आत्मन्मतेचवासनारूपस्यैवाविवेकस्यसंयोगस्यजन्महेतुतयातमोवदाव एकत
व बुद्धिरूपासादिकमंजस्यैवो ११ घतेतस्य हेतुरविद्येतिपातंजलसूत्रभाष्यकारैरविद्या
शब्देनवीजं व्याख्यातं ज्ञानस्यसंयोगेन एकालीनत्वेन संयोगाज्जनकत्वादिति ॥ अ
पिच पुरुषः प्रकृतिस्थो हि भुंक्त इत्यादिवाक्येषु अभिमानाख्यसंगस्यैव प्रकृतिस्थता
ख्यसंयोगहेतुतावगम्यते अत एव चाविद्यानाभावोपितु विरोधिज्ञानांतरमिति
योगभाष्ये व्यासदेवैः प्रपत्तेनावधृतं तस्मादविवेकाविद्ययोस्तुल्ययोगक्षेमत
यास्याविवेकस्यापिज्ञानविशेषत्वमितिसिद्धं अपंचाविवेकस्त्रियासंयोगाख्यज
न्महेतुः साक्षात्कर्मधर्मोत्पत्तिद्वारारागादिद्वेषद्वारा च भवतिसतिमूलेतद्विपाक

सां० भा० ३१ इति योगसूत्रात् कर्त्तास्मीति निवृत्तं तरति स्मृतेः वीतरागजन्मादर्शनादिति न्यायसूत्राच्च
तदुक्तं मोक्षधर्मे विज्ञानेन्द्रियोर्थानीन्द्रियार्थानोपसर्पत्यतर्षुलं हीनश्च करणैर्देही नदे
हं पुनरर्हति तस्मात्तर्षात्मका तृष्णा हि जायते जंतवरति रागस्तु अविवेककार्य
इति योगसूत्राभ्यामप्येतत्प्रत्येतव्यं समानतंत्रत्वात् तथा च सूत्रं क्लेशमूलः
कर्माशयः सति मूले तद्विपाको जात्यायुर्भोगा इति क्लेशाश्चाविद्यादयः पंचवक्तमिति
अविवेकस्यैव धर्मजनने हेतुत्वात् तच्च विज्ञेयं क्लेशेश्वरगीतायामुक्तं अनात्मन्यात्म
विज्ञानं तस्माद्दुःखं तथेतरत् रागद्वेषादयो दोषाः सर्वे भ्रान्तिनिबंधनाः कार्यो
ह्यस्य भवेद्दोषः पुण्यापुण्यमिति श्रुतिः तद्दोषादेव सर्वेषां सर्वदेहसमुद्भव इति
एतदेव मायाविसृष्टितं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनं राम० ३१

तदभावादपवर्ग इति । तदेवं संयोगस्य जन्महेतुरेवं भाख्याहे यस्य मूलकारणं अ
विवेक इति हि यः हेतुर्व्यूहः प्रतिपादितः इतः परं मक्रमप्राप्तं हानोपायव्यूहमिति
विस्तरेण शास्त्रसमाप्तिं प्रतिपादयति अतएवातएवोक्तव्यूहहानपि विस्तार
पिष्यति निपतकारणं तदुच्छित्तिर्ध्वान्तवत् शुक्तिरजतादिस्थले लोकसिद्धं
यन्निपतकारणं विवेकसाक्षात्कारः तस्मात्तस्याविवेकस्योच्छित्तिर्भवति ध्वान्त
वत् यथा ध्वान्तमालोकादेव निपतकारणं नश्यति नोपायान्तरेण तथैवावि
वेकोपि विवेकादेव नश्यति ननु कर्मादिभ्यः साक्षादस्य धीः तदेतदुक्तं योगसू
त्रेण विवेकख्यातिरविप्लवा हानोपाय इति कर्मादीनि तु ज्ञानस्यैव साधना
नि योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरविवेकख्यातेरिति योगसूत्रेण स

सां॰भा॰
३२

32

सत्त्वशुद्धिद्वारेण ज्ञानयोग्यतां गत सर्वकर्मणां साधनत्वावधारणे कृत्वा प्राचीनास्क
वेदांतिनो मोक्षेपि कर्मणो ज्ञानांगत्वमाहुः विद्यांचाविद्यांच यस्तद्वेदोभयं सह ॥
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति श्रुतौ सहकारित्वेन चेति वेदांतसू
त्रे चांगांगिभावेन ज्ञानकर्मणोः सहकारित्वावधारणं त ज्ञानिनाज्ञानिना वापि
यावद्देहस्य धारणं तावद्वर्णाश्रमप्रोक्तं कर्तव्यं कर्म मुक्षपरस्यादिस्मृतेश्च
उपमर्दं चेति वेदांतसूत्रेण तु कर्मत्यागो योगारूढस्य माय प्राप्तीनूपत एव ज्ञान
स्यैव्याप्तितो मोक्षहेतुत्वं व्यवस्थापयितुं यद्धि विशेषकृत्वा तत्कर्मज्ञानाभ्यास
स्याविरोधि भवेत तदागुणलोपेन गुणिनरतिभावेन सन्धानरक्षार्थमंगमप्तं
कर्मैव साम्यं जगु भरताद्येदिस्या शाखादितितेषां मतेपि विवेकद्वारतां विना राम॰ ३२

विवेकनाशसत्वं कर्मणो नैव सिध्यतीति न तद्विरोधः अत्र सूत्रे ध्वांतस्यालोकना
श्यत्ववचनात्तमोपि द्रव्यमेव न त्वालोकाभावः असति वा धके नीलं तमः स्यादि
मस्यानां भ्रमत्वान्नैच्छिसात न चक्तृप्ते नैवोपपत्तावतिरिक्तकल्पनागौरवमेव
बाधकमिति वाच्यं एवं च सति विज्ञानमात्रेऽपि स्वप्नवत्सर्वव्यवहारोपपत्तावति
रिक्तकल्पनागौरवेण बाह्यार्थप्रतीतेरपि बाधापत्तेः तस्मादत्र प्रामाणिकत्वान्नै
